# सिद्धान्तकौमुदी - ३

Program in which it is offered: [Integrated Masters – Vyākaraṇa]

**Course Category: [Core]** **Schedule of offering: 4**

**Course Credit Structure: [5]**

- **Lecture: [5]**
- **Tutorial: [none]**
- **Practical: [none]**

**Contact Hours per week: [5]**

## 1. Introduction

व्याकरणशास्त्रस्य प्रतिपाद्येषु अंशेषु शब्दसिद्धिप्रक्रिया प्रधानभूता वर्तते । एकस्य शब्दस्य सिद्धौ अष्टाध्याय्याः विभिन्नेभ्यः प्रदेशेभ्यः सूत्राणि आदाय तेषु तेषु प्रसङ्गेषु कार्याणि करणीयानि भवन्ति । सैषा दुर्गमा विविधशब्दसिद्धिप्रक्रिया वैयाकरणप्रवरेण भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याख्ये ग्रन्थे सुगमतया बोधिता । अपि च बहुषु प्रदेशेषु सूत्रवार्तिकभाष्याणां मतेषु भेदे दृश्यमाने यथोचितं सर्वमतानुकूलः अन्यतममतानुकूलो वा पन्थाः अनुसरणीयो भवति यः अल्पमतिभिः ग्रहीतुं न शक्यते । भट्टोजिदीक्षितेन तादृशानि स्थलानि न्यक्षेण परिशील्य सिद्धान्तभूतः अर्थः स्वग्रन्थेऽस्मिन् प्रकाशितः । तस्मात् वैयाकरणप्रक्रियया साधुशब्दस्वरूपस्य निर्णये अयं ग्रन्थः नितरामुपकारकः वरीवर्ति ।

अत्र स्त्रीप्रत्ययप्रकरणम्, कारकप्रकरणम्, समासप्रकरणानि, एकशेषप्रकरणम्, सर्वसमासशेषप्रकरणम्, समासान्तप्रकरणम्, अलुक्समासप्रकरणम्, समासाश्रयविधिप्रकरणम् इत्येते भागाः अध्याप्यन्ते । तत्र उपकारकाणां व्याख्याभागानामपि यथोचितं बोधनं भविष्यति ।

## 2. Course Objectives

अनेन क्रमेण अध्ययनस्य अन्ते छात्राः –

- स्त्रीप्रत्ययानां यथोचितं प्रयोगे, तदन्तशब्दनिष्पादने च समर्था भविष्यन्ति
- कारकाणाम्, कारकविभक्तीनाम्, उपपदविभक्तीनां च समीचीनं परिचयं प्राप्नुवन्ति

- समासानां समासप्रक्रियायाः च दृढं परिचयं प्राप्य समस्तपदानां निष्पादने सामर्थ्यवन्तो भवन्ति
- अनुवृत्त्यादिज्ञानपूर्वकं सूत्रार्थावगमे तद्व्याख्याने च पाटवं प्राप्नुवन्ति
- प्रकृतग्रन्थभागं प्रतिपङ्क्ति अधीत्य कस्यापि भागस्य व्याख्याने समर्थाः भवन्ति

## 3. Pre-requisites

- प्रकृतग्रन्थभागोपयोगिन्याः अष्टाध्याय्याः धारणा
- इतः पूर्वतनस्य ग्रन्थभागस्य सम्यक् अध्ययनम्
- सन्धिकार्याणां समासानां च ज्ञानम्

## 4. Readings

- सिद्धान्तकौमुदी, मोतिलाल बनरसीदास, भागः - १ & 2

## 5. Module-wise topics

The suggested structure is as follows:

**Module 1 – स्त्रीप्रत्ययप्रकरणम्** 15 sessions

**Objectives –**

- प्रातिपदिकेभ्यः युक्तानां स्त्रीप्रत्ययानां विधानम्
- प्रकरणान्तर्गतानां सूत्राणामर्थस्य अवबोधः
- एतस्मिन् विभागे विद्यमानां सूत्राणां सुष्ठु व्याख्याने सामर्थ्यम्

**Topics –**

- टाप्, डाप्, चाप्
- ङीप्, ङीष्, ङीन्
- ति, ष्यङ्

**Module 2 – कारकप्रकरणम्** 20 sessions

**Objectives –**

- कारकाणाम् अवगमः
- कारकविभक्तीनाम् उपपदविभक्तीनां च यथायथं प्रयोगे पाटवम्

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- कर्त्रादीनि कारकाणि
- कर्मप्रवचनीयानि
- कारकविभक्तयः
- उपपदविभक्तयः

**Module 3 – अव्ययीभावः तत्पुरुषः च** 10 sessions

**Objectives –**

- अव्ययीभावसमासस्य च तत्पुरुषसमासस्य निष्कर्षेण ज्ञानम्
- शास्त्रीयायाः समासप्रक्रियायाः बोधनम्
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः

**Topics –**

- अव्ययीभावः
- प्रथमादिविभक्त्यन्तानां तत्पुरुषसमासः
- कर्मधारयः, द्विगुः, उपपदसमासः, एकदेशिसमासः इत्यादयः तत्पुरुषभेदाः

**Module 4 – बहुव्रीहिः द्वन्द्वश्च** 10 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- अव्ययरूपाणां निष्पादने सामर्थ्यम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- द्वितीयाद्यर्थेषु बहुव्रीहिः
- चार्थाः तत्र द्वन्द्वश्च
- द्वन्द्वैकवद्भावः

**Module 5 – एकशेषः, सर्वसमासशेषः समासान्तकार्याणि च** 10 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- अव्ययरूपाणां निष्पादने सामर्थ्यम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- एकशेषः
- सर्वसमासशेषप्रकरणम्
- समासान्ते प्रत्ययाः आदेशाः च

**Module 6 – अलुक्समासप्रकरणं समासाश्रयविधिप्रकरणं च** 10 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- अव्ययरूपाणां निष्पादने सामर्थ्यम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- पञ्चम्यादीनां विभक्तीनाम् समासे लुगभावः
- ह्रस्वविधिः, हृदादय आदेशाः, समासे षत्वम्, समासे णत्वम्, सुडागमः इत्यादयः

## 6. Pedagogy

अध्यापनपद्धतिः प्रायेण उपन्यासरूपा अभ्यासरूपा च भवति । अयं विषयः प्रक्रियाबहुलः इति कारणतः लेखनफलकस्य अधिकतया उपयोगः करिष्यते । ग्रन्थाध्ययनावसरे अपेक्षितानां भागानां व्याख्यानमपि बोधयिष्यते ।

## 7. Learning Outcome

एतं ग्रन्थभागमधीतवन्तः छात्राः अत्रत्यानां सर्वेषां सूत्राणामर्थं, तल्लाभप्रकारं च सम्यक् ज्ञात्वा तैः लक्ष्यसंस्कारं च कृत्वा स्त्रीप्रत्ययान्तानि रूपाणि कारकाणि च वाक्येषु साधु प्रयोक्तुं समर्था भवन्ति । सूत्राणामर्थस्य, प्रक्रियायाः ग्रन्थस्थानां शास्त्रीयविचाराणां च मौखिकनिरूपणे समर्थाः भविष्यन्ति ।

## 8. Evaluation Pattern

- कार्यसमर्पणम् २० अङ्काः
- प्रस्तुतिः १५ अङ्काः
- सत्रार्धपरीक्षा २५ अङ्काः
- सत्रान्तपरिक्षा ४० अङ्काः